दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-281 | 1 | जुलाई 31, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णद्वितीया
श्रावण 15 प्रविष्टांशः मङ्गलमयः भवेत्

2 "संसदि 'वन्दे मातरम्' गीताय वैधानिक-संरक्षण-विधेयकः पारितं गतः, लोकसभायाः कार्याचरणं च स्थगितम्

3 हिमाचलस्य सर्वकारीय-कर्मचारिभ्यः महती सहायता, अध्ययन-अवकाश-काले लप्स्यते पूर्णं वेतनं देयाः लाभाश्च

6 भारतीय-क्रीडकः दिलीप-गावितः पुरुषैधसः 'टी-47' 100-मीटर्-पैरा-एथलेटिक्स-स्पर्धायाम् स्वर्णपदकम् जितवान्

# प्रश्नपत्र-कदाचार-निरोधाय संशोधन-विधेयकम् २०२६ संसदि पारितम्




**हिमसंस्कृतवार्ता।** संसदि सार्वजनिकपरीक्षा (अनुचितसाधनानां निवारणम्) संशोधनविधेयकम्, २०२६ पारितम्, यत् अद्य राज्यसभया स्वीकृतम्। एतत् विधेयकं ह्यः लोकसभया पारितम् आसीत्। मध्याह्नोत्तरं यदा गृहस्य उपवेशनम् पुनरारब्धं, तदा कार्मिक-लोकशिकायत-पेंशन-राज्यमन्त्री डॉ. जितेन्द्रसिंहः विधेयकं प्रस्तुतवान्। सभापतिः सी. पी. राधाकृष्णन् अवदत् यत् अस्य विधेयकस्य चर्चायाः कृते सप्त होराः (घण्टाः) आवंटिताः सन्ति। अस्मिन् विधाने अनेके महत्त्वपूर्णाः प्रावधानाः समाविष्टाः सन्ति, येषु दशवर्षाणि यावत् कारावासः, दशकोटिरूप्यकाणां यावत् दण्डः (जुर्माना), तथा च दोषिणां सम्पत्तेः स्वाधीनीकरणम् (जब्ती) सदृशाः कठोरदण्डाः सन्ति। प्रकरणानां शीघ्रनिब्पटनाय एतत् विधानम् प्रत्येकं राज्यसर्वकारं केन्द्रशासितप्रदेशप्रशासनं च प्रतिदिनं विचारणार्थम् (trial) विशेष-त्वरित-न्यायालयानां (Special Fast Track Courts) स्थापनां निर्दिशति। एतदतिरिच्य एतदपि प्रावधानं वर्तते यत् आरक्षिकाले (police station) सूचनायाः पञ्जीकरणस्य दिनाङ्कात् मासद्वयाभ्यन्तरे एव अपराधानाम् अन्वेषणं (investigation) पूर्णं भवेत्। अभियोगपत्रस्य (chargesheet) प्रस्तौनात् अनन्तरं त्रिभिः मासैः विचारणा समापनीया। विधेयकस्य चर्चायाः उत्तरं ददन् कार्मिक-राज्यमन्त्री प्रधानमन्त्रिकार्यालयस्य च मन्त्री डॉ. जितेन्द्रसिंहः अवदत् यत् एषः विषयः भारतस्य प्रत्येकं नागरिकं स्पृशति तथा च अस्य देशस्य प्रत्येकेन नागरिकेण सह सम्बद्धः अस्ति। डॉ. सिंहः प्रश्नपत्रप्रकटनस्य (paper leak) निवारणाय तथा च देशे शिक्षाव्यवस्थायां सुधाराय सर्वकारस्य प्रयत्नानाम् सूचीम् अपि उपस्थापितवान्। सः अवदत् यत् युवानः 'विकसितभारतस्य' कृते विशालं पूञ्जीनिवेशनम् सन्ति। मन्त्री अकथयत् यत् 'एम्स' (AIIMS) चिकित्सालयानां संख्या ७ तः वर्धित्वा २२ अभवत्, तथा च वैद्यकीयस्थानानि (medical seats) अपि वर्धितानि। सः अवदत् यत् एतत् चिकित्साशिक्षायाः सुलभतायाः वहनीयतायाः च माध्यमेन लोकतन्त्रीकरणम् अस्ति। राष्ट्रीयशिक्षानीतिः २०२० विगतदशके सर्वस्मात् महान् परिवर्तनकारी (game changer) सिद्धः अभवत्। मन्त्री यदा चर्चायाः उत्तरं ददाति स्म, तदा विपक्षः सदनस्य बहिष्कारं (walkout) कृतवान्। पूर्वम्, सदने विधेयकं प्रस्तुतवन् डॉ. जितेन्द्रसिंहः अवदत् यत् एतत् विधेयकं अस्मिन् देशे छात्राणां यूनां च कल्याणस्य रक्षणार्थं सर्वकारस्य सर्वोच्चप्रतिबद्धतायाः पुनःपुष्टिः अस्ति। सः अवदत् यत् नूतनविधानान्तर्गते अभियोगपत्रस्य प्रस्तौनात् अनन्तरं मासद्वयाभ्यन्तरे अन्वेषणं त्रिभिः मासैः च विचारणा पूर्णं भवेत्। डॉ. सिंहः अवदत् यत् प्रश्नपत्रप्रकटनं गम्भीरः विषयः अस्ति, तथा च देशस्य विविधभागेभ्यः विभिन्नराज्यसर्वकारेषु पूर्वतनकेन्द्रसर्वकारेषु च अनेकाः घटनाः सूचिताः अभवन्। डॉ. सिंहः सार्वजनिकपरीक्षाणां दुराचाराणां प्रश्नपत्रप्रकटनानां च प्रति मोदीसर्वकारस्य 'शून्य-सहनशीलतायाः' (zero tolerance) सङ्कल्पं पुनरुक्तवान्। डॉ. सिंहः अकथयत्, "प्रधानमन्त्री नरेन्द्रमोदी एतत् विधेयकं आनेतुं क्षणमात्रम् अपि न विलम्बितवान्, यत् सर्वकारस्य प्रतिबद्धतां दर्शयति यत् कस्यापि छात्राणां भविष्येण सह क्रीडनं न अनुमंस्यते।" चर्चां प्रारभमाणः विपक्षनेता मल्लिकार्जुनखडगे अवदत् यत् सर्वकारेण नूतनविधेयके केवलं बाह्यपरिवर्तनानि (cosmetic changes) कृतानि सन्ति तथा च प्रस्ताविताः संशोधनाः सार्वजनिकपरीक्षासु दुराचारं रोद्धुं प्रभाविनः न भविष्यन्ति।

क्रमशः द्वितीये पृष्ठे...

## दिल्ली-छात्र-प्रदर्शने द्रुत-कार्य-बलस्य आयुध-वृत्तं अस्त्र-शस्त्र-पत्रं सुरक्षितं रक्षितुं सर्वोच्च-न्यायालयस्य आदेशः



सर्वोच्च न्यायालयेन केन्द्र-सर्वकाराय प्रोक्तं यत् नीट-प्रश्नपत्रगोप्यताभङ्ग-प्रकरणे नव-दिल्ल्याः जन्तर-मन्तरस्थले विनियोजितस्य द्रुतकार्य-बलस्य आयुध-वृत्तं सुरक्षिततया स्थापनीयमिति। सर्वोच्च न्यायालयेन विधिव्यवस्था-पालनाय पैलेट-गन इत्याख्यस्य प्रयोगे पूर्ण-प्रतिबन्धस्य याचनामधिकृत्य प्रश्नः उत्थापितः । न्यायालयेन आरक्षक-अनुसन्धान-विकासाभिकरण-संस्थायाः परामर्शम् आधृत्य कथितं यत् आरक्षिणः असाधारण-स्थितिषु पैलेट-गन इत्यस्य प्रयोगार्थं अधिकृताः सन्ति। मुख्य न्यायाधीशस्य सूर्यकान्तस्य सहैव न्यायाधीशयोः जायमाल्य-बागची, वी. मोहन इत्येतेषां पीठिकया दिल्ली-सर्वकाराय अपि आदिष्टं यत् विरोधप्रदर्शनेषु ये भुशुण्डिकया व्रणिताः अभवन्, तेभ्यः उत्तमचिकित्सा-सौविध्यं प्रदातव्यमिति

## मध्य-महाराष्ट्र-तेलङ्गाणा-विदर्भ-पश्चिम-मध्यप्रदेश-राज्येषु अति-वृष्टेः सम्भावना-भारत-ऋतु-विज्ञान-विभागः

भारत-ऋतु-विज्ञान-विभागेन मध्य-महाराष्ट्र-तेलङ्गाणा-विदर्भ-पश्चिम-मध्यप्रदेश-राज्येषु अति-वृष्टेः सम्भावनां प्रकटय्य 'रैड्-अलर्ट्' इति रक्तवर्णीया संभावना प्रख्यापिता। विभागेनानेन आगामि-दिन-द्वयाभ्यन्तरे अरुणाचल प्रदेशे, केरल-माहे-क्षेत्रेषु, राजस्थान-राज्ये च मेघगर्जन-विद्युत्-पातं समेत्य अतिवृष्टेः पूर्वसूचना प्रकटीकृता। उत्तर-पूर्व-भारते अपि आगामिषु द्वि-त्रि-दिनेषु तीव्र-प्रभञ्जन-सहित-विद्युत्-पातेन सह प्रबल-वृष्टिः सेत्स्यति इति विभागेन अनुमितम्। अत्रावसाने, राष्ट्रिय-राजधान्यां नवदिल्ल्याम् अपि आगामिषु द्वि त्रि दिनेषु मेघवर्षस्य सम्भावना वर्तते।

## सुभाषितम्

**ब्रह्महापि नरः पूज्यो,**
**यस्यास्ति विपुलं धनम्।**
**शशिनस्तुल्यवंशोऽपि,**
**निर्धनः परिभूयते॥**
**(हितोपदेशः सुहृद्भेदः- ३)**

अर्थात्- इस संसार में जिसके पास बहुत-सा धन है उस ब्रह्महत्यारे मनुष्य का भी सत्कार होता है और चन्द्रमा के समान अति निर्मल वंश में उत्पन्न हुए भी निर्धन मनुष्य का अपमान किया जाता है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## पाकिस्तानाधिकृते जम्मू-काश्मीरे चत्वारिंशत् जनानां निधनानन्तरम् अपि उग्र-विरोध-प्रदर्शनं निरन्तरं प्रवर्तते

पाकिस्तानाधिकृते जम्मू-काश्मीरे सोमवासरे पाक-सुरक्षा-बलैः शान्तिपूर्ण-प्रदर्शनकारिणाम् विरूद्ध्य नृशंस-कार्याचरणं-पश्चात् चत्वारिंशत् जनानां निधनानन्तरम् अपि उग्र-विरोध-प्रदर्शनं निरन्तरं प्रवर्तते। जे.ए.ए.सी. इत्याख्यया संस्थया सम्बद्धाः सामाजिक-माध्यम-सङ्केताः आक्षेपम् अकुर्वन् यत् पाक-सुरक्षा-बलैः प्रदर्शनकारिणाम् उपरि घातक-शस्त्राणि प्रयुक्तानि। जे.ए.ए.सी. संस्थया संयुक्त राष्ट्र-सङ्घाय, अन्ताराष्ट्रिय मानवाधिकार-सङ्घटनेभ्यः, लोकतान्त्रिक-सर्वकारेभ्यः च साग्रहम् आवेदितम् यत्ते अस्मिन् विषये शीघ्रमेव हस्तक्षेपं कुर्युः।

# संसदि 'वन्दे मातरम्' गीताय वैधानिक-संरक्षण-विधेयकः पारितं गतः, लोकसभायाः कार्याचरणं च स्थगितम्



संसदा राष्ट्रिय-गौरव-अपमान-निवारण-विधेयकः षड्विंशत्यधिक-द्विसहस्रतमः पारितः । गृह-राज्यमन्त्रिणा नित्यनन्द-रायेन संशोधनार्थं अयं विधेयकः उपस्थापितः। राष्ट्रगीताय राष्ट्रगानेन समं वैधानिक-सुरक्षा-प्रदानम् विधेयकस्यास्य मुख्योद्देश्यं वर्तते। एतादृशेषु अपराधेषु त्रिवर्षात्मकः कारावासः, द्रव्यदण्डः उत वा उभयमपि भवितुमर्हतः । उत्तरप्रदानकाले गृह-राज्यमन्त्री नित्यनन्द-रायः प्रावोचत् यत् एतत् संशोधनं भारतस्य आत्मने, राष्ट्रिय-चेतनायै, सांस्कृतिक-न्यासाय सहैव स्वतन्त्रता-सङ्ग्रामस्य आदर्शेभ्यश्च सामूहिक प्रतिबद्धतां दर्शयति। सः प्रावोचत् यत् एकसप्तत्यधिक-एकोनविंशतितमे प्रवर्तितेन अधिनियमेन राष्ट्रगानस्य आदरार्थं प्रावधानानि विहितानि। इतः प्राक् चर्चायां भागं भजन्ती डी. एम. के-दलस्य के. कनिमोझी इत्येषा अस्य विधेयकस्य विरोधम् अकरोत्, तया कथितं यदयं देशे जनानां विभाजनं करोति। अपरपक्षे विधेयकस्य समर्थनं कुर्वन् बी.जे.पी-दलस्य संबित पात्रा न्यगादीत् यत् अरं विधेयकः अतीव-महत्वपूर्णः वर्तते। सः अकथयत् यत् केन्द्र-सर्वकारः गतवर्षस्य नवम्बरमासतः राष्ट्रगीतस्य सार्धैकशत-जयन्ती राष्ट्रियोत्सवरूपेण समाचरति, सहैव नरेन्द्रमोदी-सर्वकारः अनेन विधेयकेन राष्ट्रगीताय वैधानिक-सुरक्षां प्रददाति।

## प्रश्नपत्र-कदाचार-निरोधाय संशोधन-विधेयकम्...

सः अकथयत् यत् यद्यपि काङ्ग्रेस-दलम् प्रस्तावितविधेयकस्य समर्थनं करोति, तथापि अस्मिन् पारदर्शिकां प्रश्नपत्रप्रकटनमुक्तां च परीक्षां सुनिश्चितं कर्तुं अति-कठोर-प्रावधानानाम् अभावः अस्ति। श्री खडगे अवदत् यत् यदा छात्रैः प्रश्नपत्रप्रकटनस्य, परीक्षासु अनियमिततानां, संस्थागतविफलतानां च विषये चिन्ताः उत्थापिताः, तदानन्तरमेव सर्वकारेण एतत् पदं गृहीतम्।
चर्चायां भागं गृह्णन् भाजपा-दलस्य बृजलालः अवदत् यत् सर्वकारेण सार्वजनिकपरीक्षासु अनुचितसाधनानाम् दुराचाराणां च रोधाय अति-कठोर-प्राविधानं कर्तुं २०२४ तमस्य वर्षस्य अधिनियमस्य संशोधनं प्रस्तावितम् अस्ति। सः अवदत् यत् नरेन्द्रमोदीसर्वकारस्य आशयः अतीव स्पष्टः अस्ति यत् शीघ्रविचारणार्थं त्वरितन्यायालयानां स्थापनाय विधेयके प्रावधानाः समाविष्टाः सन्ति। सः अयोजितवान् यत् प्रकरणानाम् अन्वेषणाय 'विशेष-कार्य-दलस्य' (Special Task Force) गठनस्य प्राविधानम् अस्ति। द्रमुक-दलस्य (DMK) तिरुचि शिवा नीट् (NEET) परीक्षायाः उन्मूलनस्याभियाचनां कृतवान्। सः पुष्टिं कृतवान् यत् संशोधितं विधानं देशे शिक्षाव्यवस्थां न परिवर्तयिष्यति।विधेयकस्य समर्थनं कुर्वन् जदयू-दलस्य (JD-U) सञ्जयकुमारझा अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोगिनः नेतृत्वे एनडीए-सर्वकारेण चिकित्साशिक्षायाः क्षेत्रे अनेके ऐतिहासिकप्रयत्नाः कृताः सन्ति।समाजवादी-दलस्य रामगोपालयादवः अवदत् यत् केवलं दण्डस्य वर्धनेन अपराधः न रोत्स्यते। सः नीट् (NEET) परीक्षायाः उन्मूलनस्य मागं कुर्वन् अवदत् यत् राज्यानां कृते चिकित्साशिक्षायाः प्रवेशपरीक्षाः आयोजयितुं शक्तिः दातव्या।
विधानस्य समर्थनं कुर्वन् राकांपा-दलस्य (NCP) प्रफुल्लपटेलः अवदत् यत् सर्वकारः विपक्षः च सर्वे छात्राणां यूनां च भविष्यस्य विषये गम्भीराः सन्ति। सः यूनां कृते सही मार्गप्रदर्शनस्य अपि आह्वानं कृतवान्। सः विरोधप्रदर्शनस्य लोकतांत्रिकस्य अधिकारस्य समर्थनं कृतवान् किन्तु विरोधप्रदर्शनकाले प्रयुक्तायाः भाषायाः प्रकारे प्रश्नान् उत्थापितवान्।आप-दलस्य (AAP) सञ्जयसिंहः त्वरितन्यायालयेषु प्रकरणानाम् अवशिष्टतां (backlog) तथा च शिक्षायां विद्यालयेषु च सुविधानाम् अभावं रेखाङ्कितवान्।भाजपा-दलस्य सुधांशुत्रिवेदी अवदत् यत् नीट्-परीक्षाः सर्वेषां छात्राणां कृते समानं अवसरं प्रदत्तवत्यः सन्ति तथा च आर्थिकरूपेण दुर्बलवर्गाणां छात्रान् नीट्-परीक्षासु उत्तमं कुर्वतः दृष्ट्वा उत्साहः वर्धते। सः आरोपम् अकरोत् यत् विपक्षः यूनां भ्रमयितुं यतते। काङ्ग्रेस-सांसदः मुकुलवासनिकः अवदत् यत् केवलं दण्डस्य, दण्डराशेः च वर्धनेन, तथा च त्वरितन्यायालयानां स्थापनेन परीक्षासु पारदर्शिता, निष्पक्षता, विश्वसनीयता च न आगमिष्यति।अन्यैः सह तृणमूलकाङ्ग्रेस-दलस्य सागरिकाघोषः, अन्नाद्रमुक-दलस्य एम्. थम्बीदुरै, वाईएसआरसीपी-दलस्य वाई. वी. सुब्बारेड्डी, बीजद-दलस्य सन्तृप्तमिश्रः, राजद-दलस्य मनोजझा, माकपा-दलस्य जॉनब्रिटासः, तथा च केन्द्रीयमन्त्री आरपीआई-नेता रामदासआठवले अपि चर्चायां भागं गृहीतवन्तः।अनन्तरम्, अद्य प्रातः ११ वादने पुनः उपवेष्टुम् इति उक्त्वा गृहस्य उपवेशनम् तस्मिन् दिने स्थगितम् अभवत्।

# 'हिम-बस-प्लस्-कार्ड' इति माध्यमेन लाभान्विताः भविष्यन्ति लक्षाधिक-यात्रिणः, देहली-मेट्रो, पञ्जाब-हरियाणा-राज्ययोः बस-यानेषु अपि चलिष्यति एतद् यात्रापत्रम्







**हिमसंस्कृतवार्ताः — शिमला।**
हिमाचलप्रदेशे एच.आर.टी.सी. (HRTC) मध्ये नूतनस्य 'हिम-बस-प्लस-कार्ड' इत्यस्य आरम्भः अभवत्। सोलन-मण्डलस्य क्यारीघाट-स्थानात् प्रदेशस्य मुख्यमन्त्रिणा उपमुख्यमन्त्रिणा च अस्य 'कार्ड'-इत्यस्य विधिवत् रूपेण आरम्भः कृतः। अस्मिन् अवसरे प्रदेशस्य उपमुख्यमंत्री मुकेशअग्निहोत्री अवदत् यत् 'हिम-बस-प्लस्-कार्ड' इत्यस्य आरम्भः सर्वासां श्रेणीनां यात्रिभ्यः महती सुविधा सिद्धा भविष्यति। एषः 'स्मार्ट-कार्ड' एच.आर.टी.सी. संस्थायाः विविधानां यात्रा-सुविधा-योजनानां परिपत्राणां च लाभान् एकेनैव 'कार्ड'-मध्ये समाविष्टान् करिष्यति। एतद् 'परिपत्रं' केवलं ३६५ रूप्यकाणां वार्षिक-सदस्यता-शुल्क-आधारे उपलब्धः भविष्यति। तेन प्रोक्तं यत् अस्य 'कार्ड'-इत्यस्य उपयोगः देहली-मेट्रो (Delhi Metro) तथा च पञ्जाब-हरियाणा-राज्ययोः बस-सेवास्वपि कर्तुं शक्यते, येन यात्रिणां यात्रा इतोऽपि सुगमा सौविध्या च भविष्यति।
उप-मुख्यमन्त्रिणा कथितं यत् प्रदेशसर्वकारः सार्वजनिक-परिवहनस्य प्रोत्साहनाय तथा च हिमाचल-पथ-परिवहन-निगमं (HRTC) आर्थिक-रूपेण सशक्तं विधातुं निरन्तरं प्रयासरतः अस्ति। तेन उक्तं यत् आगामि-वर्षेषु निगमः १,००० विद्युत्-बस-यानानि (Electric Buses) क्रेष्यति। एतेषां २९७ नूतनानाम् बस-यानानां समावेशेन निगमे विद्युत्-बस-यानानां कुल-सङ्ख्या वर्धित्वा ५०७ संजाता अस्ति। अग्निहोत्रिणा प्रोक्तं यत् भविष्ये केवलं ४७-आसन-श्रेण्याः (47-Seater) 'डीजल'-बस-यानानि एव क्रेष्यन्ते, यदा च राज्ये चरणबद्ध-रूपेण विद्युत्-बस-यानानां सङ्ख्या वर्धयिष्यते। तेन कथितं यत् आगामि-१२ वर्षाणि यावत् समवायेन (Company) एतेषां बस-यानानाम् संरक्षणं (Maintenance) करिष्यते। उप-मुख्यमन्त्रिणा उक्तं यत् सर्वकारः प्रयासम् करोति यत् प्रत्येक-मासस्य प्रथमे दिनाङ्के कर्मचारिणां वेतनस्य तथा च प्रत्येक-मासस्य १० दिनाङ्कं यावत् पेंशन-राशेः भुक्तिः सुनिश्चिता भवेत् अस्य कृते च व्यवस्था सुव्यवस्थिता क्रियमाणा अस्ति। तेन प्रोक्तं यत् पुरातन-पेंशन-योजनायाः (OPS) पुनर्स्थापनायाः एच.आर.टी.सी. इत्यस्य ९,०९९ कर्मचारिभ्यः लाभः प्राप्तः, येन तेषां भविष्यत् अधिकं सुरक्षितं जातम्।
अस्मिन् अवसरे अतिरिक्त-मुख्य-सचिवः ओंकारचन्दशर्मा अवदत् यत् विद्युत्-बस-यानानां सञ्चालने विस्तारः पर्यावरण-संरक्षणस्य दिशि एकं महत्त्वपूर्णं पदम् अस्ति। अनेन एच.आर.टी.सी. संस्थायाः सञ्चालन-व्यये न्यूनीकरणम् आगमिष्यति यात्रिभ्यश्च सुरक्षिता, विश्रामदा, आधुनिकी च परिवहन-सुविधा उपलप्स्यते। तेन प्रोक्तं यत् सतत-सार्वजनिक-परिवहनस्य दिशि निगमस्य एषा एका ऐतिहासिकी उपलब्धिः अस्ति। अस्मिन् अवसरे एच.आर.टी.सी. इत्यस्य उपाध्यक्षः अजयवर्मा, जिला-काङ्ग्रेस-समित्याः अध्यक्षः सुभाषबरमानी, एच.पी.एस.आई.डी.सी. इत्यस्य उपाध्यक्षः अनुरागशर्मा, कैलाश-फेडरेशन इत्यस्य अध्यक्षः बलदेवठाकुरः, एच.आर.टी.सी. इत्यस्य प्रबन्ध-निदेशकः डॉ. निपुणजिन्दलः, ओलेक्ट्रा-ग्रीनटेक-लिमिटेड इत्यस्य प्रबन्ध-निदेशकः महेशबाबु, परिवहन-निदेशकः नीरजशर्मा, एच.आर.टी.सी. मण्डलस्य सदस्याः छत्रसिंहः, निशान्तठाकुरः, प्रदीपसूर्या, अजयवर्मा अन्ये च वरिष्ठ-अधिकारिणः उपस्थिताः आसन्।

# ६ वर्षाणां परं 'शिपकी-ला'-गिरिद्वारेण पुनः आरप्स्यते भारत-चीन-सीमा-व्यापारः




**हिमसंस्कृतवार्ताः — रिकोंगपियो।** किन्नौर-मण्डलस्य शिपकी-ला-गिरिद्वारस्य (दर्रे के) माध्यमेन भारत-चीनयोः मध्ये भवितव्यः सीमा-व्यापारः १ अगस्त-दिनाङ्कात् पुनः आरब्धुं गच्छति। २०१९ तमे वर्षे कोविड-१९ महामारी-काले स्थगितः एषः व्यापारः प्रायः ६ वर्षाणां दीर्घान्तरालात् परं पुनः पुनर्स्थापितः भवन् अस्ति। उपायुक्तः किन्नौर डॉ. अमितकुमारशर्मा ज्ञापितवान् यत् २०२६ तमस्य अस्य व्यापारिक-ऋतोः (Season) कृते सर्वाः आवश्यकाः सज्जताः पूर्णाः संजाताः। व्यापाराणां 'ट्रेड-पास' (Trade Pass) सम्बद्धा सुरक्षा-स्वीकृतिः पूर्ववृत्त-सत्यापनस्य प्रक्रिया च सम्पन्ना अभवत्।उपायुक्त-महोदयेन प्रोक्तं यत् प्रथमे चक्रे (दौर में) प्रायः १५ तः १७ व्यापारिणाम् सीमा-पारं गमनस्य सम्भावना अस्ति। प्रसारितेन दिशानिर्देशानुसारम्, चीन-देशस्य सीमायां प्रवेशं कुर्वद्भिः व्यापारीभिः ७२ होराभ्यन्तरे प्रत्यावर्तनम् अनिवार्यं भविष्यति। २.५८ कोटि-रूप्यकाणां व्ययेन निर्मितस्य अस्य 'ट्रेडमार्ट' (Trade Mart) इत्यस्य औपचारिकम् उद्घाटनं मन्त्रिमण्डल-मन्त्रिणा जगतसिंहनेगी-महोदयेन करिष्यते। अस्मात् आधुनिकात् 'ट्रेडमार्ट'-माध्यमेन स्थानीय-व्यापारिभ्यः व्यापारे महती सुविधा लप्स्यते। विदेश-व्यापार-महानिदेशालयस्य वाणिज्य-सीमा-शुल्क-मन्त्रालयस्य च सूच्याः अनुसारं आहत्य ३६ भारतीय-वस्तूनि चीन-देशं प्रति निर्यातुं शक्ष्यन्ते, यदा च चीन-देशस्य पक्षतः २० वस्तूनि भारतीय-विपण्याम् (बाजार में) आगन्तुं शक्ष्यन्ति।तेन कथितं यत् क्षेत्रे 'सङ्गरोध-केन्द्रम्' (Quarantine Centre) इत्यस्य स्थापना न भवतः कारणेन अस्मिन् ऋतौ 'जीवित-पशूनाम् (लाइव-एनिमल्स) व्यापारः न भवितुं शक्ष्यति। 'वाइब्रैंट-विलेज-स्कीम' इत्यस्य अन्तर्गतं 'क्वारंटीन-सैंटर' इत्यस्य प्रस्तावः प्रेषितः अस्ति। एतद् केन्द्रम् सिद्धे सति अस्मात् मार्गात् पशूनां व्यापारः अपि सम्भवः भवितुं शक्ष्यति। उपायुक्तः डॉ. अमितकुमारशर्मा आशाम् अकरोत् यत् २०२६ तमस्य ऋतोः एषः व्यापारः न केवलं स्थानीय-व्यापारिभ्यः अत्यधिकं लाभदायकः सिद्धः भविष्यति, अपितु किन्नौरस्य अर्थनीतेः समग्र-अर्थव्यवस्थायाः च कृते अपि नूतनां शक्तिं प्रदास्यति।

# Kinnaur Kailash Yatra 2026 - किन्नौर-कैलाश-यात्रा आरब्धा, प्रथमे दिने १०७ भक्ताः प्रस्थिताः




**हिमसंस्कृतवार्ताः — रिकोंगपियो।** किन्नौर-कैलाश-यात्रा गुरुवासरात् आधिकारिक-रूपेण आरब्धा। यात्रायाः प्रथमे दिने तङ्गलिंग-ग्रामात् १०७ भक्ताः प्रस्थिताः, येषु पञ्च महिला-भक्ताः अपि सम्मिलिताः आसन्। प्रथमे दिने 'ऑन-लाइन'-पञ्जीकरणं कृतवत्सु १७५ भक्तेषु केवलं ५० भक्ताः एव यात्रां कर्तुं सम्प्राप्ताः, यदा च मध्याह्ने १२ वादनं यावत् ५७ भक्ताः तङ्गलिंग-आधार-शिविरे (Base Camp) 'ऑफ-लाइन'-पञ्जीकरणं कृतवन्तः, ये यात्रायां प्रेषिताः। मध्याह्नात् १२ वादनात् परं समागच्छन्तः भक्ताः आगामि-दिने यात्रायां प्रेषयिष्यन्ते।प्रथमे दिने यात्रायां गच्छतां भक्तानां सङ्ख्या न्यूना आसीत्, परन्तु भक्तेषु महान् उत्साहः दृष्टः। भक्ताः भगवान्-भोलेनाथस्य जयघोषं कुर्वन्तः यात्रायां प्रस्थिताः। भक्तानां प्रेषणात् पूर्वं तेषां चिकित्सा-स्वास्थ्य-प्रमाणपत्राणां परीक्षणं कृतम्। ये भक्ताः स्वास्थ्य-प्रमाणपत्रं न रचितवन्तः आसन्, तेषाम् अस्मिन्नेव स्थाने परीक्षणं विहितम्। प्रशासनेन भक्तानां सुरक्षायाः कृते दृढाः प्रबन्धाः कृताः सन्ति। सम्पूर्णे मार्गे चिकित्सानां, आरक्षिणां (Police) तथा च आपदा-प्रबन्धन (SDRF) दलानि नियुक्तानि सन्ति। एतानि दलानि आपात-स्थितौ त्वरित-साहाय्यं प्रापयितुं उपस्थितानि स्थास्यन्ति।
यात्रा-मार्गे सङ्कटपूर्णेषु स्थानेषु रज्जवः (Ropes) स्थापिताः सन्ति। एतदतिरिच्य तङ्गलिंग-आधार-शिविरे प्रायः ६० भक्तानां वासाय निःशुल्क-व्यवस्था कृता अस्ति। यदा च यात्रायाः द्वितीये आधार-शिविरे गणेशबागे व्यक्तिगत-शिविरेषु (Private Camps) १३०० रूप्यकाणि प्रति-भक्तम् निर्धारितानि सन्ति। अस्यां राशौ एकं शयन-तल्पम्, रात्रेः भोजनं तथा च प्रातः अल्पाहारः लप्स्यते। प्रशासनेन एकस्मिन् दिने आहत्य ३७५ भक्तेभ्यः एव यात्रायाः अनुमतिः दत्ता। ४ अगस्त दिनाङ्कं यावत् 'ऑन-लाइन'-द्वारे (Portal) सर्वाणि स्थानानि (Slots) आरक्षिताणि सन्ति। प्रशासनम् अधुना 'ऑन-लाइन'-पञ्जीकरण-द्वारं ५ अगस्त दिनाङ्के पुनः उद्घाटयिष्यति। 'ऑफ-लाइन'-पञ्जीकरणं तङ्गलिंग-आधार-शिविरे प्रतिदिनं भविष्यति। ज्ञाप्यते यत् किन्नौर-कैलाश-यात्रायाः १६ किलोमीटर-मितः दीर्घः मार्गः अतीव दुर्गमः अस्ति। भक्ताः ६,०५० मीटर-मितस्य उच्चतायां स्थितां प्राकृतिकं शिवलिंगं प्राप्तव्याः भवन्ति। मार्गे उच्छलन्त्यः नद्यः, हिमवाहिन्यः (Glaciers) प्राणवायु-न्यूनता (Oxygen Deficiency) च सदृशाः गम्भीराः बाधाः आयान्ति। एषः मार्गः स्वकीयानाम् कठिनतानाम् कृते ज्ञायते, यस्य कृते विशेष-सज्जीकरणस्य आवश्यकता भवति।

# हिमाचलस्य सर्वकारीय-कर्मचारिभ्यः महती सहायता, अध्ययन-अवकाश-काले लप्स्यते पूर्णं वेतनं देयाः लाभाश्च




**हिमसंस्कृतवार्ताः — शिमला।**
हिमाचलस्य सुक्खू-सर्वकारेण कर्मचारिभ्यः महती साहाय्यता प्रदत्ता। सर्वकारेण अध्ययन-अवकाशेन (Study Leave) सम्बद्धेषु नियमेषु परिवर्तनं कृत्वा निर्णयः गृहीतः यत् अधुना अध्ययन-अवकाशे गच्छद्भ्यः कर्मचारिभ्यः पूर्णं वेतनं दीयते। वित्तविभागेन केन्द्रीय-सिविल-सेवा-नियमः, १९७२ इत्यस्मिन् संशोधनस्य अधिसूचना प्रसारिता। संशोधनानुसारम् अध्ययन-अवकाश-काले कर्मचारिभ्यः पूर्णं वेतनं, महार्घता-वृत्तिः (DA) गृह-भाटक-वृत्तिः (HRA) च लप्स्यते। यदि कर्मचारिणे छात्रवृत्तिः 'स्टाइपेण्ड' वा प्राप्यते, तर्हि तस्य समायोजनं 'लीव-सैलरी'-मध्ये करिष्यते।
संशोधनं ७ अगस्त २०२४ दिनाङ्कात् प्रभावी मंस्यते। सर्वकारेण ५६-तमे नियमे कृतेन संशोधनानुसारम्, यदि कश्चन कर्मचारी अध्ययनाय विदेशं गच्छति तर्हि तस्मै अवकाशात् पूर्वमेव कार्य-काले (Duty) प्राप्यमाणं पूर्णं अवकाश-वेतनं दास्यते। अनेन सह नियमानुसारं महार्घता-वृत्तिः गृह-भाटक-वृत्तिः च अपि लप्स्यते। एषा एव व्यवस्था देशस्य अभ्यन्तरे अध्ययन-अवकाशे गच्छतां कर्मचारिणाम् उपरि अपि प्रवर्तिता भविष्यति।

# धर्मशालायाः विधायकस्य उपरि 'एफआईआर' (FIR), आयतः अधिकसम्पत्तिप्रकरणे विजिलेन्स-विभागेन सुधीरशर्मा निगृहीतः

हिमाचलप्रदेशराज्यसतर्कता-भ्रष्टाचारनिरोधकब्यूरो-विभागेन धर्मशालायाः भाजपा-विधायकस्य पूर्वमन्त्रिणः च सुधीरशर्मणः विरुद्धं ज्ञातायस्रोतोभ्यः अधिकसम्पत्तिधारणस्य आरोपाय 'एफआईआर' (FIR) पञ्जीकृता। प्राथमिकान्वेषणे प्राप्तपुष्टदस्तावेजानां सर्वकार्याभिकरणानां च मूल्यांकनप्रतिवेदनं (रिपोर्ट) आधारीकृत्य विजिलेन्स-विभागेन धर्मशाला-आरक्षिकाले (police station) भ्रष्टाचारनिवारणअधिनियमस्य सम्बद्धधारासु एफआईआर पञ्जीकृता। राज्यसर्वकारः एतां कार्यान्वयनं भ्रष्टाचारस्य विरुद्धं स्वस्य 'शून्य-सहनशीलता' (zero tolerance) नीतेः भागं कथयति, अपरत्र अनया कार्यान्वयनेन प्रदेशस्य राजनैतिक-उत्तापः (राजनीतिक पारा) अधिकः वर्धितः। एतत् प्रकरणम् 'सोर्स इन्फॉर्मेशन रिपोर्ट' इत्याख्यस्य आधारेण कृतायाः प्राथमिकान्वेषणायाः समाप्त्याः अनन्तरं भ्रष्टाचारनिवारणअधिनियम, १९८८ अस्य सम्बद्धधाराणाम् अन्तर्गतं पञ्जीकृतम् अस्ति। प्राथमिकान्वेषणकाले विजिलेन्स-ब्यूरो-विभागेन विविधसर्वकार्यानुभागेभ्यः वैधानिकसंस्थाभ्यः च प्राप्तानां वित्तीय-सम्पत्तिसम्बद्ध-अभिलेखानां जाञ्चः कृता। एतेषु आयकररिटर्न (ITR), निर्वाचन-शपथपत्राणि घोषणाः च, सम्पत्तिसम्बद्धाः दस्तावेजाः, गृहनिर्माण-अग्रिमधनस्य (House Building Advance) अभिलेखः तथा च सक्षम-अधिकारिभ्यः प्राप्ता सम्पत्तिमूल्यांकन-रिपोर्ट इत्यादयः समाविष्टाः सन्ति।

# शास्त्रतत्त्वज्ञानाय स्वाध्यायात्पूर्वं विद्यार्थिभिर्गुरूणां ग्रन्थानां च मानसपूजनमवश्यमेव कर्तव्यम्- डॉ. सुबोधकुमारसाहूः







**हिमसंस्कृतवार्ताः- प्रज्ञा द्विवेदी, झारखण्डः।**

हजारीबागनगरे सन्तकोलम्बामहाविद्यालयस्य संस्कृतविभागेन गुरुपूर्णिमापर्व अतीवश्रद्धया भक्त्या गरिमामये वातावरणे च अपाल्यत। कार्यक्रमस्य शुभारम्भः दीपप्रज्ज्वलनेन अभवत्। ततः पतञ्जलिमिश्रः सरस्वतीवन्दनाम् अगायत्। तदनन्तरं विद्यार्थिनः भगवन्तं कृष्णद्वैपायनवेदव्यासं स्वगुरून् च विधिपूर्वकम् अपूजयन्। अस्य कार्यक्रमस्य अध्यक्षता सन्तकोलम्बा- महाविद्यालयस्य संस्कृतविभागाध्यक्षेण डॉ. सुबोधकुमारसाहुवर्येण विहिता। अस्मिन् अवसरे अन्यविभागानां शिक्षकाः अपि उपस्थिताः आसन्। हिन्दीविभागस्य प्राध्यापकः डॉ. भुनेश्वरकुमारः अद्यतने काले आरुणिमिव एकलव्यमिव च गुरुभक्तिः आवश्यकी अस्ति इति न्यरूपयत्। तत्र उपस्थितः अर्थशास्त्रशिक्षकः देवेंद्रप्रसादः गुरोः महत्ता सर्वदा सर्वकाले अचलारूपेण तिष्ठति इति अभाषत। तदैव राष्ट्रियछात्रसेनाविभागाध्यक्षः डॉ. शत्रुघ्नपांडेयः गुरुशिक्षकाध्यापकानां मध्ये विद्यमानं भेदं स्पष्टीकृत्य गुरोः विभिन्नस्वरूपाणां विषये चर्चां निरवर्तयत्। अपरः हिन्दीविभागस्य प्राध्यापकः डॉ. अवधेशकुमारः विद्यार्थिनः आशीर्वादान् अयच्छत्। यथोक्तं श्वेताश्वतरोपनिषदि षष्ठाध्याये त्रयोविंशे मन्त्रे यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः इति अर्थात् यथा यस्य श्रद्धा यादृशी देवेष्वस्ति तादृश्येव श्रद्धा यदि गुरौ अस्ति चेत् तं सर्वेषां विषयाणां अवगमनं भवत्येव। अस्माकमपि श्रद्धा तादृशी एव भवेत् वस्तुतः अस्माभिः श्रद्धा प्राप्तव्या चेत् गुरोः कृपा आवश्यकी एवं गुरुकृपा प्राप्तव्या चेत् श्रद्धा आवश्यकी अनयोः अन्योन्याश्रय सम्बन्धः वर्तते। अन्ते कार्यक्रमाध्यक्षः डॉ. सुबोधकुमारसाहूः गुरोः महत्त्वं प्रकाशयन् ज्ञानप्रदाता एव गुरुः भवति इति अघोषयत्। सः 'कृष्णं वन्दे जगद्गुरुम्' इति विषयम् अधिकृत्य स्वविचारान् सविस्तरं प्राकटयत्। तदनन्तरं संस्कृतविभागस्य सर्वे सदस्याः दूरस्थानां ज्ञाताज्ञातगुरूणां च मानसपूजनम् अकुर्वन्। उपस्थिताः विद्यार्थिनः स्वगुरून् प्रति कृतज्ञतां प्रकटीकृत्य तेषाम् आदर्शानाम् अनुसरणाय सङ्कल्पम् अकुर्वन्। अन्ते धन्यवादज्ञापनेन सह कार्यक्रमः साफल्येन समपद्यत॥

# मुंशी प्रेमचन्दस्य जयन्त्यवसरे कथावाचनकार्यक्रमः आयोजितः




**हिमसंस्कृतवार्ताः – सत्येन्द्र पाठकः, लखनऊ।**

हिन्दीसाहित्यस्य उपन्याससम्राट् इति प्रसिद्धस्य मुंशीप्रेमचन्दस्य जयन्त्यवसरे तस्य साहित्यिकावदानस्य स्मरणार्थं कथारङ्ग-प्रतिष्ठानेन उत्तरप्रदेश-हिन्दी-संस्थाने, लखनऊ-नगरे कथावाचनकार्यक्रमः आयोजितः।

कार्यक्रमस्य शुभारम्भः मुख्यातिथिभिः, विशिष्टातिथिभिः, अध्यक्षा नूतनवशिष्ठ-महोदयया, सचिवया अनुपमा-शरद्-महोदयया, उपाध्यक्षा पुनीता-अवस्थी-महोदयया च दीपप्रज्ज्वलनेन अभवत्।अस्मिन् कार्यक्रमे प्राथमिकविद्यालय-उजरियाँव, गोमतीनगर-प्राथमिकविद्यालय-जियामऊ, नवयुगकन्यामहाविद्यालयस्य तथा सी.एम्.एस्. राजेन्द्रनगरस्य छात्रैः प्रेमचन्दस्य कथानां भावपूर्णं वाचनं कृतम्।मुख्यातिथिः डॉ. रामबहादुरमिश्रः स्वीयसम्बोधने अवदत् यत् कथारङ्ग-प्रतिष्ठानं स्वस्थापनकालादारभ्य साहित्यसेवायै समर्पितभावेन कार्यं करोति। विशिष्टातिथिः अलका-प्रमोद-महोदया उक्तवती यत् बालकान् कथावाचनाय प्रेरयितुं संस्थायाः एषः प्रयत्नः अत्यन्तं प्रशंसनीयः अस्ति तथा च एतादृशाः कार्यक्रमाः निरन्तरं प्रवर्तनीयाः।

कथावाचने परी, ऋतु, आर्यन्, शिफा, मरियम्, रेहान्, आस्था, खुशी, मञ्जू, रैना, गरिमा, आद्विकः, एलेस्का इत्यादयः छात्राः स्वकीयाः प्रस्तुतयः प्रदर्शितवन्तः।कार्यक्रमस्य सञ्चालनं कौन्तेयजय-महोदयेन कृतम्। अपूर्वा-अवस्थी, सुमन-मिश्रा, मालविका, ममता, अर्चना-मानस, ऋषिता, सोनल् इत्यादयः साहित्यप्रेमिणः अपि कार्यक्रमे उपस्थिताः आसन्।


# गुरुपूर्णिमायां संस्कृताध्ययनकेन्द्रस्य ऑनलाइन-समारोहः श्रद्धाभक्तिपूर्वकं सम्पन्नः




**हिमसंस्कृतवार्ताः- डॉ. रामसेवकमिश्रः, हजारीबाग।**

गुरुपूर्णिमायाः पावनावसरे संस्कृताध्ययनकेन्द्रेण गरिमामयः ऑनलाइन-समारोहः आयोजितः। अस्य कार्यक्रमस्य शुभारम्भः लक्ष्मीपाण्डेय भावपूर्णया सरस्वतीवन्दनया अकरोत्। ततः गोस्वामीपीयूष-महोदयेन गुरुजनानां स्वागताभिनन्दनं कृतम्।

अस्य कार्यक्रमस्य कुशलं मञ्चसञ्चालनं गोस्वामीपीयूषेण कृतम्। कार्यक्रमे विद्यार्थिभिः विविधसांस्कृतिक- वैचारिकी- प्रस्तुतिभिः गुरुशिष्यपरम्परायाः प्रति स्वीयां श्रद्धां समर्पणभावं च व्यक्तीकृतम्। तदनन्तरं गुंजनमेहता-महोदयया गुरुपूर्णिमायाः महत्त्वविषये स्वीयाः विचाराः प्रस्तुताः। प्रियाभगिन्या श्लोकपाठः प्रस्तुतः। मुस्कानभगिन्या गुरुसमर्पितं गीतम् अगायत्। साधनाभगिन्यापि गुरुसमर्पितं गीतम् अगायत्। आदर्शः आशीषश्च गुरुतत्त्वविषये स्वीयौ विचारौ व्यक्तवन्तौ। ज्योत्स्नामहोदयया स्वीयान् जीवनानुभवान् प्रस्तूय दर्शितं यत् कथम् एकस्य गुरोः सान्निध्येन तस्याः जीवनस्य दिशा परिवर्तिता। स्वानुभवाधारितया भावपूर्णया प्रस्तुत्या सा उपस्थितान् सर्वान् विद्यार्थिनः गाढतया प्रेरितवती।तदनन्तरं श्रीगौरवद्विवेदीवर्येण स्वस्य प्रेरणामयेन उद्बोधनेन विद्यार्थिनाम् उत्साहवर्धनं कृतम्। तेन गुरुशिष्यपरम्परायाः गरिमायाः तथा जीवने गुरोः महत्त्वस्य विषये स्वीयाः विचाराः व्यक्ताः।एतस्मादनन्तरं डॉ. मनीषचन्द्रपाण्डेयेन स्वैराशीर्वचनैः विद्यार्थिनः अनुगृहीताः। तेन जीवने गुरौ श्रद्धा-अनुशासन-समर्पणभावान् आत्मसात् कर्तुं सन्देशः प्रदत्तः। अस्मिन् कार्यक्रमे मुख्याध्यक्षरूपेण हजारीबागस्थितस्य 'संस्कृताध्ययनकेन्द्रम्' इति संस्थायाः सञ्चालकः डॉ. मिश्ररामसेवकः उपस्थितान् सम्बोधितवान्। तेन उक्तं यत् प्राचीनकाले गुरोः यावत् महत्त्वम् आसीत्, तावदेव अद्यापि विद्यते, विज्ञानस्य प्रौद्योगिक्याश्च कियत् अपि उन्नतिः भवतु। तेन गुरुकृपायाः वास्तविकस्वरूपं सुस्पष्टीकृत्य तस्याः महत्त्वस्य विषये विस्तरेण प्रकाशः पातितः। सहैव तेन आदर्शविद्यार्थिनः चत्वारि प्रमुखलक्षणानि उल्लिख्य उक्तं यत् मातापितरौ एव प्रत्येकबालकस्य प्रथमौ गुरूस्तः; अतः तयोः निर्णयानां सम्मानः प्रत्येकविद्यार्थिनः परमं कर्तव्यमस्ति। अन्ते लक्ष्मीपाण्डेय धन्यवादज्ञापनं अकरोत्। ततः प्रवीणेन शान्तिमन्त्रेण सह कार्यक्रमस्य समापनं कृतम्। गुरुपूर्णिमायाः आयोजनस्य माध्यमेन गुरुशिष्यपरम्परायाः प्रति श्रद्धा, भारतीयसंस्कृतेः प्रति आस्था तथा गुरुकृपायाः महत्त्वं पुनः रेखाङ्कितम्। एतदायोजनं सर्वेषां सहभागिनां कृते प्रेरणादायकं सिद्धम् तथा सर्वेषु नूतनाम् ऊर्जाम् अजनयत्।



# लौकिकन्यायकोशः

## कनककुण्डलन्यायः

सुवर्णं सुवर्णस्य आभूषणानि च नाम्ना रूपेण च भिन्नानि भवन्ति चेदपि सुवर्णस्य दृष्ट्या तानि एकरूपाणि एव। तेषां पूर्णतः साम्यं भवति। तथा कार्यस्य कारणस्य च मध्ये तादात्म्यम् अस्ति। इति अयं न्यायः बोधयति। एतत् जगत् एकं कार्यं, ब्रह्म च एतस्य कारणं तथा द्वयोः अपि अभेदः एव इति अनेन न्यायेन सूच्यते।

यथा- वाचारम्भणं विकारो नामधेयं सुवर्णमित्येव सत्यम्।

सुवर्ण-अलङ्काराणाम् उदाहरणद्वारा श्रीगुलाबरावमहाराजः अनध्यस्तविवर्तनामकं सिद्धान्तं प्रतिपादितवान्।

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**

# लखनऊ :-विधानसभायाः समक्षं प्रदर्शनात् पूर्वमेव कोटेदाराः निरुद्धाः, अगस्तमासे राशनवितरणं स्थगयितुं सचेतना



**हिमसंस्कृतवार्ताः सत्येन्द्र पाठकः, लखनऊ।**

उत्तरप्रदेशस्य विभिन्नजनपदेभ्यः समागताः शताधिकाः कोटेदाराः स्वदीर्घकालिकाभियाचनानां पूर्त्यर्थं लखनऊनगरं समागताः। ऑल इण्डिया फेयर प्राइस शॉप डीलर्स फेडरेशन इत्यस्य नेतृत्वे तैः चारबागस्थानात् विधानसभां प्रति पदयात्रां कृत्वा मुख्यमन्त्रिणे ज्ञापनं प्रदातुं योजना कृता आसीत्। किन्तु विधानसभायाः समक्षं प्रदर्शनात् पूर्वमेव पुलिसप्रशासनेन तेषां मार्गः अवरुद्धः। पश्चात् सर्वे प्रदर्शनकारिणः बसयानैः इको-गार्डन-नामकं निर्धारितं प्रदर्शनस्थलं प्रेषिताः।

कोटेदारैः उक्तं यत् ते दीर्घकालात् स्वमागणानां समाधानम् अपेक्षमाणाः सन्ति, किन्तु अद्यावधि शासनपक्षात् कश्चन ठोसनिर्णयः न कृतः। सङ्गठनेन चेतावनी दत्ता यत् यदि शासनं शीघ्रं तेषां मागणिषु सकारात्मकं निर्णयं न करिष्यति, तर्हि अगस्तमासे समग्रे उत्तरप्रदेशे राशनवितरणं स्थगितं भवितुम् अर्हति। एतदर्थम् आन्दोलनस्य रूपरेखा पूर्वमेव विभिन्नजनपदेषु आयोजितसभासु निर्धारिता इति अपि उक्तम्।कोटेदारानां प्रमुखमागणीषु प्रतिक्विण्टलं ₹२०० लाभांशस्य (कमीशनस्य) व्यवस्था प्रमुखा वर्तते। तेषां कथनानुसारम् उत्तरप्रदेशे सम्प्रति प्रतिक्विण्टलं केवलं ₹९० लाभांशः प्रदीयते, यः वर्धमानमूल्यवृद्धेः सञ्चालनव्ययस्य च अपेक्षया अत्यल्पः अस्ति। हरियाणा-दिल्ली-राज्ययोः प्रतिक्विण्टलं ₹२००, गोवाराज्ये च ₹२३० पर्यन्तं लाभांशः प्रदीयते। गुजरातराज्ये तु कोटेदाराणां कृते न्यूनतम-आय-गारण्टी-व्यवस्था अपि प्रवर्तते।तदतिरिक्तं प्रदर्शनकारिभिः कोरोनाकाले (नवम्बर २०२१) निःशुल्कराशनवितरणस्य अवशिष्टभुगतानं, बाजारमूल्येन वितरितखाद्यान्नस्य लम्बितनिधेः विमोचनं, गोधूमक्रयसमये समर्पितानां रिक्तबोरिकाणां मूल्यभुगतानं च शीघ्रं कर्तव्यमिति मागणी कृता। तेषां मते दीर्घकालात् लम्बितभुगतानस्य कारणेन आर्थिकसङ्कटं निरन्तरं वर्धते। सङ्गठनस्य प्रदेशाध्यक्षः राजेश तिवारी अवदत् यत् न्यूनलाभांशस्य कारणात् कोटेदाराणां कृते दुकानसञ्चालनं परिवारपालनं च कठिनं जातम्। उत्तरप्रदेशेऽपि गुजरात- तमिलनाडु- केरल-राज्यानामिव नियमितमानदेयव्यवस्था प्रवर्तनीयेति तेन आग्रहः कृतः।प्रदर्शनकाले सङ्गठनेन स्पष्टतया उक्तं यत् यदि शासनं सम्बन्धितविभागश्च समये निर्णयं न करिष्यतः, तर्हि अगस्तमासे राशनवितरणस्य स्थगनमपि कर्तुं बाध्याः भविष्यन्ति। अस्मिन् विषये शासनपक्षात् अद्यावधि काप्यधिकृतप्रतिक्रिया न प्राप्ता। वर्तमाने पुलिसप्रशासनेन विधिव्यवस्था सुरक्षितं स्थाप्य प्रदर्शनकारिणः नियन्त्रिताः, ते च इको- गार्डन- प्रदर्शनस्थलं प्रेषिताः। अधुना कोटेदाराणां शासनस्य च मध्ये भविष्यति वार्तायाः परिणामः सर्वेषां ध्यानाकर्षणस्य विषयः अभवत्।

**हिमसंस्कृतवार्ताः, ईदरधीररजः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ताकार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। मया अद्यतनीयाः विचित्राः वार्ताः सङ्गृहीताः।

**काव्या-** न्यूजीलैण्डदेशे आकाशे महत्यः उल्काः जनैः दृष्टाः।

**काव्या-** ताभिः उल्काभिः महान् विस्फोट-ध्वनिः उत्पादितः।

**नन्दिनी-** अहो, एषा खगोलघटना अतीव आश्चर्यकरी!

**नन्दिनी-** केन्यादेशे गजानां विषये अधिकारिणः कां वार्तां ज्ञातवन्तः सन्ति?

**काव्या-** तस्मिन् देशे पञ्चदश गजाः पक्षाघातेन मृताः।

काव्या- अतः वनरक्षकैः तस्य रहस्यस्य अन्वेषणम् आरब्धम्।

**नन्दिनी-** गजानां मरणं तु अतीव दुःखदम्।

**नन्दिनी-** क्यानडादेशे मत्स्यदुर्गन्धस्य विषये जनाः किम् अनुभूतवन्तः सन्ति?

**काव्या-** तत्र एकस्मिन् ग्रामे विंशतिवर्षाणि सञ्चितः मत्स्यरसपङ्कः अभूत्।

**काव्या-** अन्ते सः पङ्कः कर्मकरैः निष्कासितः।

**नन्दिनी-** विंशतिवर्षाणां दुर्गन्धस्य मार्जनं बहु सम्यक् कृतम्!

**नन्दिनी-** जापानदेशे भूकम्पस्य समये मार्जारेण किं कृतम्?

**काव्या-** भूकम्पात् पूर्वम् एव एकेन मार्जारेण भयम् अनुभूतम्।


**काव्या-** सः मार्जारः प्रकम्पनात् पूर्वम् एव उत्थितवान् अस्ति।

**नन्दिनी-** पशूनां पूर्वज्ञानशक्तिः अतीव विस्मयकरी।

**नन्दिनी-** सर्वाः वार्ताः ज्ञानवर्धिकाः। धन्यवादः काव्ये।

# झूठा दखावा




दखावे रा ज़माना अजकल सब करदे दखावा
हुई गईरे दुनियाँ भरा रे कट्ठे ठग
दूजे रा घर नी बसणा चाहिंदा
अपने घरा सैंहटी जाए पावें अग्ग

सब अपूं जो बड़ा दसणा चाहन्दे
चादरी ते बाहर पैर पसारेया करदे
पट्रोला जोगे पैसे अये निएं गट्ठी
कारां बड्डियां बड्डियां रखणे रा दम भरदे

सब्सिडी खाणे जो बैंका ते लैणा कर्जा
अपूं घुमणा कारां च बापू मरी जाए भरदा
सब्सिडी खादीह लोन बी मुकवाया
नवींयां जगह पैसेयां खातर भी हत्थ फलाया

इक्की ते लया दूजे रा टाहया
इंयाई अपणा कम्म चलाया
जेबा नियां तेहला मारनी बुढ़कां
कम्म कडणे जो सच झूठ गलाया

देखा देखी करदे बौहत ज़्यादा
फ्री री मिलो तां बोतल टकांदे
कर्जे च डूबी रे सिरा ते पैरा तक
पैसा लई कने किसिरा नी टाहन्दे

झूठा दखावा करी कने कुछ नी मिलणा
मिलणा तां ई अया जे कुछ कमांहगे
बैठे बठाये कुसी नी देणा मित्रो
तांईं मिलणा कुछ जे अपणेयां जाहणा लाहंगे

**रवींद्र कुमार शर्मा**
**घुमारवीं जिला बिलासपुर हि प्र**

# प्रवेशः न प्राप्तः, तर्हि छात्रेण 'हैक' कृता 'आईआईटी'-संस्थानस्य 'वेबसाइट', 'आईआईटी' कानपुरस्य अस्ति एतत् प्रकरणम्

प्रतिवर्षं देशस्य लक्षाधिकः छात्राः 'आईआईटी' सदृशेषु बृहत्सु प्रतिष्ठितेषु च संस्थानेषु प्रवेशं प्राप्तुं स्वप्नं पश्यन्ति, अस्य कृते कठिनां परिश्रमं च कुर्वन्ति। अस्मिन्नेव अन्तराले 'आईआईटी' कानपुर-संस्थानेन सम्बद्धम् एकम् एतादृशं प्रकरणं समक्षम् आगतम्, यस्मिन् प्रवेशः न प्राप्तेन क्रुद्धेन एकेन छात्रेण स्वस्य 'साइबर-सिक्योरिटी' कौशलं दर्शयितुं संस्थानस्य 'वेबसाइट्' एव 'हैक' कृता। प्रकरणे सम्मुखम् आगते सति संस्थानेन वैधानिककार्यान्वयनस्य स्थाने छात्रस्य तकनीकी-क्षमतां परीक्षितुम् निर्णयः गृहीतः। वार्तानुसारम्, एकेन छात्रेण 'आईआईटी' कानपुरस्य नवीन-बीटेक 'साइबर-सिक्योरिटी' पाठ्यक्रमे प्रवेशार्थम् आवेदनं कृतम् आसीत्। छात्रस्य दावा अस्ति यत् तेन आवेदनप्रक्रिया पूर्णा कृता, निश्चिता शुल्का जमा कृता, सर्वाणि आवश्यक-दस्तावेजानि 'अपलोड' कृतानि तथा च स्वस्य 'साइबर-सिक्योरिटी' कौशलेन सम्बद्धानि प्रमाणानि अपि दत्तानि।अस्यानन्तरम् अपि तस्य चयनम् न अभवत्। ततः सः 'आईआईटी' कानपुरस्य 'वेबसाइट्' हैक कृत्वा तस्याम् 'साइट् इज् हैकड्, ऑल् आई नीड् इज् जस्ट् ए फेयर चान्स' (वेबसाइट् हैक-कृता अस्ति, मह्यम् केवलम् एकः न्याय्यः अवसरः आवश्यकः इति सन्देशम् त्यक्तवान्। न केवलं एतावत्, तेन सामाजिक-माध्यम-मञ्चयोः 'एक्स' (X) तथा 'रेडिट्' (Reddit) इत्येतयोः अस्य 'स्क्रीनशॉट्' अपि प्रसारितम् तथा च उक्तं यत् तस्य उद्देश्यं कस्यापि प्रकारस्य हानिं प्रापयितुं न आसीत्, अपितु स्वस्य तकनीकी-क्षमतां सिद्धं कर्तुम् आसीत्।

**'हैकथॉन' मध्ये आत्मानं सिद्धं कर्तुं न शक्तवान् छात्रः**

'आईआईटी' कानपुरस्य निदेशकस्य प्राध्यापक-मणीन्द्र-अग्रवालस्य अनुसारम्, अस्यां प्रवेशप्रक्रियायां छात्रेभ्यः 'हैकथॉन' माध्यमेन स्वप्रतिभां दर्शयितुम् अवसरः दत्तः आसीत्, किन्तु सम्बद्धः छात्रः तस्मिन् चरणे आत्मानं सिद्धं कर्तुं न समर्थः अभवत्। अस्यानन्तरं तेन 'वेबसाइट्' मध्ये हैक कृत्वा स्वस्य 'साइबर-सिक्योरिटी' कौशलं दर्शयितुं प्रयत्नः कृतः। प्रारम्भे संस्थानेन छात्रस्य विरुद्धम् 'एफआईआर' पञ्जीकरणाय विचारः कृतः आसीत्। तथापि, अनन्तरं निर्णयः गृहीतः यत् प्रथमं तस्य पुष्टिनां तथा च तकनीकी-क्षमतायाः अध्ययनं क्रियेत।

# दिल्ली पब्लिक स्कूल, बोकारो-विद्यालये समूहगायने विविधराज्यानां सांस्कृतिकच्छटा, वाद्यवृन्दस्पर्धायां च चलचित्रसङ्गीतधुनिनां समुज्ज्वलः समारोहः







## धरोहर' सांस्कृतिकसप्ताहे डीपीएस- बोकारो-विद्यालयस्य छात्रैः स्वप्रतिभया सर्वे मन्त्रमुग्धाः कृताः

**हिमसंस्कृतवार्ताः- सौरभ दे, बोकारो।**

दिल्ली पब्लिक स्कूल, बोकारो-विद्यालये प्रचलिते ‘धरोहर’ इति सांस्कृतिकसप्ताहस्य अन्तर्गतं गुरुवासरे अन्तरसदनीय- वाद्यवृन्दस्पर्धा समायोजिता। अस्मिन् कार्यक्रमे समसामयिक- बॉलीवुड-चलच्चित्रसङ्गीताधारितेषु वाद्यप्रस्तावनेषु विद्यालयस्य षट्सदनानां छात्राः स्वकौशलं प्रदर्शितवन्तः। तबला, गिटार, क्लैप- बॉक्स, की- बोर्ड, वेणुः, ड्रम, कोंगो इत्यादीनां विविधवाद्ययन्त्राणां मधुरस्वरैः सम्पूर्णः परिसरः करतालध्वनिभिः प्रतिध्वनितः अभवत्। छात्रीणामपि प्रस्तुतीनां विशिष्टं कौशलं सर्वेषां प्रशंसाम् अलभत। कार्यक्रमस्य शुभारम्भः रावी- सदनस्य छात्रैः ऊर्जस्वलवाद्यप्रस्तुत्या अभवत्। ततः क्रमशः चेनाबसदनं, सतलज-सदनं, जमुना-सदनं, झेलम-सदनं, गङ्गा-सदनस्य च छात्रैः विविधचलच्चित्रगीतानां मधुरधुनयः वाद्ययन्त्रैः सुमनोहररूपेण प्रस्तूय उपस्थितजनान् मन्त्रमुग्धान् अकुर्वन्। अस्याः स्पर्धायाः निर्णायकाः अञ्जलिकुमारी, प्रणतिदासः, मयङ्ककुमारभक्तश्च आसन्।अस्मात् पूर्वं आयोजितायाम् अन्तर्सदनीय- समूहगायनस्पर्धायां विद्यार्थिभिः भारतस्य विविधराज्यानां लोकगीतानि सुमधुरस्वरेण प्रस्तूय देशस्य सांस्कृतिकवैविध्यस्य मनोहरं दर्शनं कारितम्। चेनाबसदनस्य छात्रैः राजस्थानी- लोकगीतस्य प्रस्तुतिर्निर्वहिता। तदनन्तरं जमुना- सदनस्य विद्यार्थिभिः ओडिशाराज्यस्य, रावी- सदनस्य छात्रैः उत्तरप्रदेशस्य, सतलज-सदनस्य दलैः पश्चिमबङ्गस्य, गङ्गासदनस्य छात्रैः पञ्जाबप्रदेशस्य, अन्ते झेलम-सदनस्य विद्यार्थिभिः झारखण्डराज्यस्य लोकसांस्कृतिकवैभवं सुमधुरगीतैः सजीवं प्रदर्शितम्।समूहगायनस्पर्धायां प्राथमिकविभागस्य शिक्षकाः जयप्रकाशसिन्हा, प्रियङ्का, स्वीटी अनिलकुमारश्च निर्णायकत्वेन उपस्थिताः आसन्। उभयोः स्पर्धयोः परिणामाः सांस्कृतिकसप्ताहस्य समापनदिने शनिवासरे घोषयिष्यन्ते।

विद्यालयस्य प्राचार्यः डा. ए. एस. गङ्गवारः विद्यार्थिनां कलात्मकप्रतिभायाः मुक्तकण्ठेन प्रशंसां कृतवान्। सः अवदत् यत् “सङ्गीतम् आत्मनः मानसिकशान्तेः च सर्वोत्तमं साधनम् अस्ति। भारतं विविधतायाः देशः अस्ति। अत्रत्याः संस्कृतिः अस्माकं अमूल्या धरोहरः अस्ति। विद्यार्थिभिः स्वप्रस्तुतिभिः न केवलं भारतीयसंस्कृतेः सौन्दर्यं प्रदर्शितम्, अपि तु सांस्कृतिकविरासतां संरक्षितुं प्रेरणापि प्रदत्ता।” कार्यक्रमे मञ्चसज्जा, वर्णवर्णानि वेशभूषणानि तथा विद्यार्थिनां मनोहररूपसज्जा अपि सर्वेषाम् आकर्षणस्य केन्द्रम् अभवत्। अवसरेऽस्मिन् निर्णायकैः अपि स्वविचाराः व्यक्तीकृताः, विद्यालयस्य सङ्गीतशिक्षकैः स्वप्रस्तुतिभिः वातावरणम् अधिकं रमणीयं कृतम्।

# जय जालाराम आयुर्वेदिक-चिकित्सामहाविद्यालये गुरुपूर्णिमा-महोत्सवः श्रद्धाभक्तिपूर्वकं भव्यतया सम्पन्नः



**हिमसंस्कृतवार्ता।** जय जालाराम आयुर्वेदिक मेडिकल कॉलेज, शिवपुरी इत्यत्र गुरुपूर्णिमा-महोत्सवः श्रद्धाभक्तिपूर्वकं भव्यतया च सम्पन्नः। कार्यक्रमस्य शुभारम्भः दीपप्रज्वलनेन, धन्वन्तरिवन्दनया, भगवानः वेदव्यासस्य पूजनेन च अभवत्। ततः परं महाविद्यालयस्य समस्तगुरूणां पूजनं सर्वैः छात्रैः श्रद्धया कृतम्।अस्य कार्यक्रमस्य मुख्यातिथिरूपेण उपस्थितः ट्रस्टी डा.विजयः पटेलः स्वस्य प्रेरणादायकेन उद्बोधनेन भारतीयगुरुशिष्यपरम्परायाः महत्त्वं, परम्परागतज्ञानस्य आधुनिकप्रौद्योगिक्या सह समन्वयस्य आवश्यकता, मूल्याधारितशिक्षायाः महत्त्वं च सम्यक् प्रतिपादितवान्।अस्मिन् अवसरे महाविद्यालयस्य प्राचार्यः डा. सिबा प्रसादः शर्मा तथा समस्तः अध्यापकवर्गः उपस्थितः आसीत्। सर्वैरध्यापकैः छात्रेभ्यः आशीर्वचनानि प्रदत्तानि।कार्यक्रमस्य सञ्चालनं सोहमः तथा केया इत्येताभ्यां कुशलतया कृतम्। ततः परं डा. भद्रेशः पटेलः महोदयेन चरकसंहितानुसारं सर्वेभ्यः छात्रेभ्यः छात्रप्रतिज्ञा कारिता। अनन्तरं नवागतविद्यार्थिनां स्वागतं अभिनन्दनं च सम्पन्नम्।विद्यार्थिभिः "आयुर्वेदावतरणम्" तथा "गुरुशिष्यपरम्परा" इति विषययोः नाट्यप्रस्तुतिः सम्यक् प्रदर्शिता। तथा च जयदीपः परमारः एवं मैत्री इत्येताभ्यां गुरुशिष्यपरम्परायाः महत्त्वविषये प्रेरणादायकं वक्तव्यं प्रस्तुतम्।

## कार्यक्रमस्य समापनकाले डा. चिरागः पुरोहितः आभारप्रदर्शनम् अकरोत्।

अयं गुरुपूर्णिमा-महोत्सवः जय जालाराम आयुर्वेदिक मेडिकल कॉलेज, शिवपुरी तथा संस्कृतभारती, पञ्चमहाल-जनपदस्य संयुक्तसहयोगेन सफलतया सम्पन्नः। सम्पूर्णः कार्यक्रमः महाविद्यालयस्य सर्वेषां छात्राणां सक्रियसहभागितया, अनुशासनेन, समर्पणभावेन च उत्कृष्टरीत्या सम्पन्नः। उपस्थितैः अतिथिभिः, प्राचार्येण, अध्यापकैः तथा सर्वैः दर्शकैः विद्यार्थिनामुत्तममायोजनं, सांस्कृतिकप्रस्तुतयः, सेवाभावश्च मुक्तकण्ठेन प्रशंसिताः।

## भारतीय-क्रीडकः दिलीप-गावितः पुरुषैधसः 'टी-47' 100-मीटर्-पैरा-एथलेटिक्स-स्पर्धायाम् स्वर्णपदकम् जितवान्




भारतीय-एथलीट-क्रीडकः दिलीप-गावितः पुरुषैधसः 'टी-47' 100-मीटर्-पैरा-एथलेटिक्स-स्पर्धायाम् उत्कृष्टं प्रदर्शनं कुर्वन् ऐतिहासिकं स्वर्णपदकं जितवान्। दिलीप-गावितः पुरुषैधसः 'टी-47' 100-मीटर्-धावनस्पर्धायां १०.७१ 'सेकण्ड्'-समयं गृहीत्वा क्रीडायाः 'रिकॉर्ड' (कीर्तिमानम्) स्वस्य ऋतोः (season) च उत्तमं समयं रचयित्वा स्वर्णपदकं प्राप्तवान्। तथैव, तस्य सहक्रीडकः मोहम्मद-बासिल-मोर्सिंगनाकथः १०.८३ 'सेकण्ड्'-समयं गृहीत्वा रजतपदकं जितवान्। अनेन ऐतिहामिकेन प्रदर्शनेन सह दिलीप-महादु-गावितः पैरा-एथलेटिक्स-स्पर्धायां राष्ट्रमण्डल-क्रीडासु (Commonwealth Games) स्वर्णपदकं जेता प्रथमः भारतीय-पुरुष-क्रीडकः अभवत्। सह एव, महिला-शॉटपुट-एफ-57-स्पर्धायां शर्मिलायाः स्वर्णपदकस्य अनन्तरं, राष्ट्रमण्डल-क्रीडासु पैरा-एथलेटिक्स-स्पर्धायां पदकं जेता सः आहत्य द्वितीयः भारतीय-पैरा-एथलीट-क्रीडकः अस्ति।